श्री काळी कवचं (जगन्मंगळं)

श्री काळी कवचं (जगन्मंगळं)

भैरव्युवाच |
काळीपूजा श्रुता नाथ भावाश्च विविधाः प्रभो |
इदानीं श्रोतुमिच्छामि कवचं पूर्वसूचितं || 1 ||

त्वमेव शरणं नाथ त्राहि मां दुःखसंकटात् |
सर्वदुःखप्रशमनं सर्वपापप्रणाशनं || 2 ||

सर्वसिद्धिप्रदं पुण्यं कवचं परमाद्भुतं |
अतो वै श्रोतुमिच्छामि वद मे करुणानिधे || 3 ||

श्री भैरव उवाच |
रहस्यं शृणु वक्ष्यामि भैरवि प्राणवल्लभे |
श्रीजगन्मंगळं नाम कवचं मंत्रविग्रहं || 4 ||

पठित्वा धारयित्वा च त्रैलोक्यं मोहयेत् क्षणात् |
नारायणोऽपि यद्धृत्वा नारी भूत्वा महेश्वरं || 5 ||

योगिनं क्षोभमनयद्यद्धृत्वा च रघूद्वहः |
वरदीप्तां जघानैव रावणादिनिशाचरान् || 6 ||

यस्य प्रसादादीशोऽपि त्रैलोक्यविजयी प्रभुः |
धनाधिपः कुबेरोऽपि सुरेशोऽभूच्छचीपतिः || 7 ||

एवं च सकला देवाः सर्वसिद्धीश्वराः प्रिये |
श्रीजगन्मंगळस्यास्य कवचस्य ऋषिः शिवः || 8 ||

छंदोऽनुष्टुप् देवता च काळिका दक्षिणेरिता |
जगतां मोहने दुष्टविजये भुक्तिमुक्तिषु |
योविदाकर्षणे चैव विनियोगः प्रकीर्तितः || 9 ||

अथ कवचं |

शिरो मे काळिका पातु क्रींकारैकाक्षरी परा |

क्रीं क्रीं क्रीं मे ललाटं च काळिका खड्गधारिणी || 10 ||

हूं हूं पातु नेत्रयुग्मं ह्रीं ह्रीं पातु श्रुतिद्वयं |

दक्षिणे काळिके पातु घ्राणयुग्मं महेश्वरी || 11 ||

क्रीं क्रीं क्रीं रसनां पातु हूं हूं पातु कपोलकं |

वदनं सकलं पातु ह्रीं ह्रीं स्वाहा स्वरूपिणी || 12 ||

द्वाविंशत्यक्षरी स्कंधौ महाविद्याखिलप्रदा |

खड्गमुंडधरा काळी सर्वांगमभितोऽवतु || 13 ||

क्रीं हूं ह्रीं त्र्यक्षरी पातु चामुंडा हृदयं मम |

ऐं हूं ॐ ऐं स्तनद्वंद्वं ह्रीं फट् स्वाहा ककुत्स्थलं || 14 ||

अष्टाक्षरी महाविद्या भुजौ पातु सकर्तृका |

क्रीं क्रीं हूं हूं ह्रीं ह्रीं पातु करौ षडक्षरी मम || 15 ||

क्रीं नाभिं मध्यदेशं च दक्षिणे काळिकेऽवतु |

क्रीं स्वाहा पातु पृष्ठं च काळिका सा दशाक्षरी || 16 ||

क्रीं मे गुह्यं सदा पातु काळिकायै नमस्ततः |

सप्ताक्षरी महाविद्या सर्वतंत्रेषु गोपिता || 17 ||

ह्रीं ह्रीं दक्षिणे काळिके हूं हूं पातु कटिद्वयं |

काळी दशाक्षरी विद्या स्वाहांता चोरुयुग्मकं || 18 ||

ॐ ह्रीं क्रीं मे स्वाहा पातु जानुनी काळिका सदा |

काळी हृन्नामविधेयं चतुर्वर्गफलप्रदा || 19 ||

क्रीं हूं ह्रीं पातु सा गुल्फं दक्षिणे काळिकेऽवतु |

क्रीं हूं ह्रीं स्वाहा पदं पातु चतुर्दशाक्षरी मम || 20 ||

खड्गमुंडधरा काळी वरदाभयधारिणी |

विद्याभिः सकलाभिः सा सर्वांगमभितोऽवतु || 21 ||

काळी कपालिनी कुल्ला कुरुकुल्ला विरोधिनी |
विप्रचित्ता तथोग्रोग्रप्रभा दीप्ता घनत्विषः || 22 ||

नीला घना बलाका च मात्रा मुद्रा मिता च मां |
एताः सर्वाः खड्गधरा मुंडमालाविभूषणाः || 23 ||

रक्षंतु मां दिग्विदिक्षु ब्राह्मी नारायणी तथा |
माहेश्वरी च चामुंडा कौमारी चाऽपराजिता || 24 ||

वाराही नारसिंही च सर्वाश्रयातिभूषणाः |
रक्षंतु स्वायुधेर्दिक्षुः दशकं मां यथा तथा || 25 ||

इति ते कथितं दिव्यं कवचं परमाद्भुतं |
श्रीजगन्मंगळं नाम महामंत्रौघविग्रहं || 26 ||

त्रैलोक्याकर्षणं ब्रह्मकवचं मन्मुखोदितं |
गुरुपूजां विधायाथ विधिवत् प्रपठेत्ततः || 27 ||

कवचं त्रिःसकृद्वापि यावज्ज्ञानं च वा पुनः |
एतच्छतार्धमावृत्य त्रैलोक्यविजयी भवेत् || 28 ||

त्रैलोक्यं क्षोभयत्येव कवचस्य प्रसादतः |
महाकविर्भवेन्मासात् सर्वसिद्धीश्वरो भवेत् || 29 ||

पुष्पांजलीन् काळिकायै मूलेनैव पठेत् सकृत् |
शतवर्षसहस्राणां पूजायाः फलमाप्नुयात् || 30 ||

भूर्जे विलिखितं चैतत् स्वर्णस्थं धारयेद्यदि |
शिखायां दक्षिणे बाहौ कंठे वा धारणाद्बुधः || 31 ||

त्रैलोक्यं मोहयेत् क्रोधात् त्रैलोक्यं चूर्णयेत् क्षणात् |
पुत्रवान् धनवान् श्रीमान् नानाविद्यानिधिर्भवेत् || 32 ||

ब्रह्मास्त्रादीनि शस्त्राणि तद्गात्रस्पर्शनात्ततः |
नाशमायांति सर्वत्र कवचस्यास्य कीर्तनात् || 33 ||

मृतवत्सा च या नारी वंध्या वा मृतपुत्रिणी |
बह्वपत्या जीववत्सा भवत्येव न संशयः || 34 ||

न देयं परशिष्येभ्यो ह्यभक्तेभ्यो विशेषतः |
शिष्येभ्यो भक्तियुक्तेभ्यो ह्यन्यथा मृत्युमाप्नुयात् || 35 ||

स्पर्धामुद्भूय कमला वाग्देवी मंदिरे मुखे |
पौत्रांतं स्थैर्यमास्थाय निवसत्येव निश्चितं || 36 ||

इदं कवचमज्ञात्वा यो जपेद्दक्षकाळिकां |
शतलक्षं प्रजप्त्वापि तस्य विद्या न सिद्ध्यति || 37 ||

सहस्रघातमाप्नोति सोऽचिरान्मृत्युमाप्नुयात् |
जपेदादौ जपेदंते सप्तवाराण्यनुक्रमात् || 38 ||

नोधृत्य यत्र कुत्रापि गोपनीयं प्रयत्नतः |
लिखित्वा स्वर्णपात्रे वै पूजाकाले तु साधकः |
मूर्ध्नि धार्य प्रयत्नेन विद्यारत्नं प्रपूजयेत् || 39 ||

इति श्री काळी जगन्मंगळ कवच स्तोत्रं |